॥ ॐ ॥

॥ अथ अगस्त्यसंहितोक्तसुन्दरकाण्डपारायणक्रमः ॥

श्रुत्वैवं सुन्दरं काण्डं पुरा वाल्मीकिना कृतम् । यत्र प्रवृत्तिः सीताया रामस्य च निवेदनम् ॥
सन्तानार्थी धनार्थी वा साम्राज्यार्थी च मानवः । राजबन्धविमोक्षार्थीमोक्षार्थी वाऽपियोभवेत् ॥
तत्तत्फलमवाप्नोति सीतारामप्रसादतः ॥ २ ॥
आवृत्त्या चैकविंशत्या पुत्रसन्तानमाप्नुयात् ॥ ३ ॥
पञ्चविंशतिसर्गांश्च प्रत्यहं पठते तु यः । महद्धनमवाप्नोति गृहधान्यादिकं च सः ॥ ४ ॥
प्रत्यहं सप्तसर्गांश्च पठित्वा वत्सरं नरः । महत्साम्राज्यमाप्नोति पृथ्वीन्द्रैश्च प्रपूज्यते ॥ ५ ॥
चतुस्त्रिंशत्तु सर्गांश्च पठित्वा युग्मगे दिने । तावत्या चैव चावृत्त्या राजबन्धाद्विमुच्यते ॥
यथाशक्ति पठित्वा तु यावज्जीवं नरोत्तमः । ऐहिकं तु सुखं प्राप्य मोक्षमीयात्परत्र च ॥
अनावृष्ट्यां प्रवृत्तायामवग्रहनिवृत्तये । पठेच्च सुन्दरं काण्डं सुवृष्टिश्च ततो भवेत् ॥ ८ ॥
किं बहूक्तेन विधिना सर्वाभीष्टप्रदायकम् । नातोऽन्यद्विद्यते लोक इहामुत्रफलप्रदम् ॥
विप्रश्रेष्ठादिदं श्रुत्वा कृत्वा ब्राह्मणभोजनम् । पूजयेच्चैव चाचार्यं गोभूवस्त्रादिभूषणैः ॥

முன்பு வால்மீகியால் இயற்றப்பட்டதும், ஸீதையின் ஸமாசாரங்களோ ஸ்ரீராமனுக்குக் கூறுவதுமான ஸுந்தரகாண்டத்தைக் கேட்டால், சந்தானத்தை இச்சிப்பவனும், தனத்தை இச்சிப்பவனும், சாம்ராஜ்யத்தை இச்சிப்பவனும், அரசன் கட்டிலிருந்து மோசனத்தை இச்சிப்பவனும், மோட்சத்தை இச்சிப்பவனும், ஸ்ரீ ஸீதாராமப்பிரஸாதத்தால் அந்தந்த பலன்களை அடைகிறார்கள். இருபத்தோரு தடவை பாராயணம் செய்தால் புத்திரசந்தானத்தை அடைவான். ஒருவன் ஒவ்வொருநாளும் இருபத்தைந்து ஸர்க்கங்கள் பாராயணம் செய்தால் அதிகம் தனத்தையும், வீடு, தான்யம் முதலியவற்றையும் பெறுவான். ஒருவன் ஒரு வருஷம் முடிய தினம் ஒன்றுக்கு ஏழேழு ஸர்க்கங்களாக பாராயணம் செய்தால் பெரிய சாம்ராஜ்யத்தை அடைகிறான். அரசர்களால் பூஜிக்கவும்படுகிறான். ஒவ்வொரு நாளும் மூப்பத்திநான்கு ஸர்க்கங்களாக 2 நாட்களில் காண்டத்தை முடிப்பது என்கிற கிரமத்தில் 34 ஆவர்த்தி பாராயணம் செய்தால் ராஜபந்தனத்தினின்று விடுபடுகிறான். சக்தியனுசரித்து உயிருடனிருக்கும்வரை பாராயணம்செய்யும் ஒருவன் இவ்வுலகில் சுகமனுபவித்து மோட்சத்தையுமடைகிறான். மழையில்லாதகுங்காலங்களில் துர்பிக்ஷநிவர்த்திக்காக ஸுந்தரகாண்டத்தை படித்தால் நல்ல மழை பெய்யும். அனேக விதிகளைச் சொல்வதால் என்ன பயன்? இவ்வுலகில் சகலாபீஷ்டங்களையும்கொடுப்பது ஸுந்தரகாண்டபாராயணமே தவிர வேறொன்றுமே இல்லை. ஓர் பிராமணச்ரேஷ்டனிடமிருந்து இதைக்கேட்டு பிராமணஸந்தர்ப்பணைசெய்து, ஆசாரியனை பசு, பூமி, வஸ்திரம் முதலியவற்றால் பூஜிக்கவேண்டும்.

इत्यगस्त्यसंहितोक्त सुन्दरकाण्डपारायणक्रमः समाप्तः ॥

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy